# shrIlAkinIsahasranAmastotram

# શ્રીલાકિનીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : lAkinIsahasra maNipUra sthita shakti

File name : lAkinIsahasra.itx

Category : sahasranAma, devii, ShaTchakrashakti, stotra, devI, yoginI

Location : doc_devii

Author : Traditional

Transliterated by : Mark S.G. Dyczkowski muktAbodha

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale uttaratantre bhairava bhairavI sa.nvAde

Latest update : May 25, 2008

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીલાકિનીસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
આનન્દભૈરવી ઉવાચ ।
અથ સમ્ભેદનાર્થાય વક્ષ્યે ષટ્પઙ્કજસ્ય ચ ।
મહારુદ્રસ્ય દેવસ્ય શ્રી શ્રીમૃત્યુઞ્જયસ્ય ચ ॥ ૧॥

લાકિની શક્તિસહિતં સહસ્રનામમઙ્ગલમ્ ।
અષ્ટોત્તરશતવ્યાપ્તં નિગૂઢં ભવ સિદ્ધયે ॥ ૨॥

ધારયિત્વા પઠિત્વા ચ શ્રુત્વા વા નામમઙ્ગલમ્ ।
શ ૃણુષ્વ પરમાનન્દ યોગેન્દ્ર ચન્દ્રશેખર ॥ ૩॥

તવાહ્લાદપ્રણયનાત્ સર્વસમ્પત્તિપ્રાપ્તયે ।
મણિયોગસુસિદ્ધ્યર્થં સાવધાનાઽવધારય ॥ ૪॥

અષ્ટોત્તરસહસ્રનામમઙ્ગલસ્ય કહોડ
ઋષિર્ગાયત્રીચ્છન્દો મહારુદ્રમૃત્યુઞ્જયલાકિની સરસ્વતીદેવતા
સર્વાભીષ્ટશચીપીઠયોગસિદ્ધ્યર્થે વિનિયોગઃ ।
ૐ મૃત્યુઞ્જય રુદ્રાદિ લાકિન્યાદિ સરસ્વતી ।
મૃત્યુજેતા મહારૌદ્રી મહારુદ્રસરસ્વતી ॥ ૫॥

મહારૌદ્રો મૃત્યુહરો મહામણિવિભૂષિતા ।
મહાદેવો મહાવક્ત્રો મહામાયા મહેશ્વરી ॥ ૬॥

મહાવીરો મહાકાલો મહાચણ્ડેશ્વરી સ્નુષા ।
મહાવાતો મહાભેદો વીરભદ્રા મહાતુરા ॥ ૭॥

મહાચણ્ડેશ્વરો મીનો મણિપૂરપ્રકાશિકા ।
મહામત્તો મહારાત્રો મહાવીરાસનસ્થિતા ॥ ૮॥

માયાવી મારહન્તા ચ માતઙ્ગી મઙ્ગલેશ્વરી ।
મૃત્યુહારી મુનિશ્રેષ્ઠા મનોહારી મનોયવા ॥ ૯॥

મણ્ડલસ્થો મનીલાઙ્ગો માન્યા મોહનમૌલિની ।
મત્તવેશો મહાબાણો મહાબલા મહાલયા ॥ ૧૦॥

મારી હારી મહામારી મદિરામત્તગામિની ।
મહામાયાશ્રયો મૌની મહામાયા મરુત્પ્રિયા ॥ ૧૧॥

મુદ્રાશી મદિરાપી ચ મનોયોગા મહોદયા ।
માંસાશી મીનભક્ષશ્ચ મોહિની મેઘવાહના ॥ ૧૨॥

માનભઙ્ગપ્રિયો માન્યા મહામાન્યો મહાબલા ।
મહાબાણધરો મુખ્યો મહાવિદ્યા મહીર્યસી ॥ ૧૩॥

મહાશૂલધરોઽનન્તો મહાબલી મહાકુલા ।
મલયાદ્રિનિવાસી ચ મતિર્માલાસનપ્રિયા ॥ ૧૪॥

માયાપતિર્મહારુદ્રો મરુણાહતકારિણી ।
માલાધારી શઙ્ખમાલી મઞ્જરી માંસભક્ષિણી ॥ ૧૫॥

મહાલક્ષણસમ્પન્નો મહાલક્ષણલક્ષણા ।
મહાજ્ઞાની મહાવેગી મૌષલી મુષલપ્રિયા ॥ ૧૬॥

મહોખ્યો માલિનીનાથો મન્દરાદ્રિનિવાસિની ।
મૌનીનામન્તરસ્થશ્ચ માનભઙ્ગા મનઃસ્વિની ॥ ૧૭॥

મહાવિદ્યાપતિર્મધ્યો મધ્યે પર્વતવાસિની ।
મદિરાપો મન્દહરો મદનામદનાસના ॥ ૧૮॥

મદનસ્થો મદક્ષેત્રો મહાહિમનિવાસિની ।
મહાન્ મહાત્મા માઙ્ગલ્યો મહામઙ્ગલધારિણી ॥ ૧૯॥

મહાહીનશરીરશ્ચ મનોહરતદુદ્ભવા ।
માયાશક્તિપતિર્મોહા મહામોહનિવાસિની ॥ ૨૦॥

મહચ્ચિતો નિર્મલાત્મા મહતામશુચિસ્થિત ।
મત્તકુઞ્જરપૃષ્ઠસ્થો મત્તકુઞ્જરગામિની ॥ ૨૧॥

મકરો મરુતાનન્દો માકરી મૃગપૂજિતા ।
મણીપૂજ્યા મનોરૂપી મેદમાંસવિભોજિની ॥ ૨૨॥

મહાકામી મહાધીરો મહામહિષમર્દિની ।

મહિષાસુરબુદ્ધિસ્થો મહિષાસુરનાશિની ॥ ૨૩॥

મહિષસ્થો મહેશસ્થો મધુકૈટભનાશિની ।
મધુનાથશ્ચ મધુપો મધુમાંસાદિસિદ્ધિદા ॥ ૨૪॥

મહાભૈરવપૂજ્યશ્ચ મહાભૈરવપૂજિતા ।
મહાકાન્તિ પ્રિયાનન્દો મહાકાન્તિસ્થિતાઽમરા ॥ ૨૫॥

માલાકોટિધરો માલો મુણ્ડમાલાવિભૂષિતા ।
મણ્ડલજ્ઞાનનિરતો મણિમણ્ડલવાસિની ॥ ૨૬॥

મહાવિભૂતિક્રોધસ્થો મિથ્યાદોષસરસ્વતી ।
મેરુસ્થો મેરુનિલય મેનકાનુજરૂપિણિ ॥ ૨૭॥

મહાશૈલાસન મેરુમોહિની મેઘવાહિની ।
મઞ્જુઘોષો મઞ્જુનાથો મોહમુદ્ગરધારિણી ॥ ૨૮॥

મેઢ્રસ્થો મણિપીઠસ્થો મૂલરૂપા મનોહરા ।
મઙ્ગલાર્થો મહાયોગી મત્તમેહસમુદ્ભવા ॥ ૨૯॥

મતિસ્થિત મનોમાનો મનોમાતા મહોન્મની ।
મન્દબુદ્ધિહરો મૃત્યુર્મૃત્યુહન્ત્રી મનઃપ્રિયા ॥ ૩૦॥

મહાભક્તો મહાશક્તો મહાશક્તિર્મદાતુરા ।
મણિપુરપ્રકાશશ્ચ મણિપુરવિભેદિની ॥ ૩૧॥

મકારકૂટનિલયો માના માનમનોહરી ।
માક્ષરો માતૃકાવર્ણો માતૃકાબીજમાલિની ॥ ૩૨॥

મહાતેજા મહારશ્મિર્મન્યુગ સ્યાન્ મધુપ્રિયા ।
મધુમાંસસમુત્પન્નો મધુમાંસવિહારિણી ॥ ૩૩॥

મૈથુનાનન્દનિરતો મૈથુનાલાપમોહિની ।
મુરારિપ્રેમસંતુષ્ટો મુરારિકરસેવિતા ॥ ૩૪॥

માલ્યચન્દનદિગ્ધાઙ્ગો માલિની મન્ત્રજીવિકા ।
મન્ત્રજાલસ્થિતો મન્ત્રી મન્ત્રિણાંમન્ત્રસિદ્ધિદા ॥ ૩૫॥

મન્ત્રચૈતન્યકારી ચ મન્ત્રસિદ્ધિપ્રિયા સતી ।
મહાતીર્થપ્રિયો મેષો મહાસિંહાસનસ્થિતા ॥ ૩૬॥

મહાક્રોધસમુત્પન્નો મહતી બુદ્ધિદાયિની ।
મરણજ્ઞાનરહિતો મહામરણનાશિની ॥ ૩૭॥

મરણોદ્ભૂતહન્તા ચ મહામુદ્રાન્વિતા મુદા ।
મહામોદકરો મારો મારસ્થા મારનાશિની ॥ ૩૮॥

મહાહેતુહરો હર્તા મહાપુરનિવાસિની ।
મહાકૌલિકપાલશ્ચ મહાદૈત્યનિવારિણી ॥ ૩૯॥

માર્તણ્ડકોટિકિરણો મૃતિહન્ત્રી મૃતિસ્થિતા ।
મહાશૈલોઽમલો માયી મહાકાલગુણોદયા ॥ ૪૦॥

મહાજયો મહારુદ્રો મહારુદ્રારુણાકરા ।
મનોવર્ણમૃજોમાખ્યો મુદ્રા તરુણરૂપિણી ॥ ૪૧॥

મુણ્ડમાલાધરો માર્યો માર્યપુષ્પમૃજામની ।
મઙ્ગલપ્રેમભાવસ્થા મહાવિદ્યુત્પ્રભાઽચલા ॥ ૪૨॥

મુદ્રાધારી મતસ્થૈર્યો મતભેદપ્રકારિણી ।
મહાપુરાણવેત્તા ચ મહાપૌરાણિકાઽમૃતા ॥ ૪૩॥

મૌનવિદ્યો મહાવિદ્યા મહાધનનિવાસિની ।
મઘવા માઘમધ્યસ્થા મહાસૈન્યા મહોરગા ॥ ૪૪॥

મહાફણિધરો માત્રા માતૃકા મન્ત્રવાસિની ।
મહાવિભૂતિદાનાઢ્યા મેરુવાહનવાહના ॥ ૪૫॥

મહાહ્લાદો મહામિત્રો મહામૈત્રેયપૂજિતા ।
માર્કણ્ડેયસિદ્ધિદાતા માર્કણ્ડેયાયુષિસ્થિતા ॥ ૪૬॥

માર્કણ્ડેયો મુહુઃપ્રીતો માતૃકામણ્ડલેશ્વરી ।
માનસંસ્થો માનદાતા મનોધારણતત્પરા ॥ ૪૭॥

મયદાનવચિત્તસ્થો મયદાનવચિત્રિણી ।
મહાગુણધરાનન્દો મહાલિઙ્ગવિહારિણી ॥ ૪૮॥

મહેશ્વરસ્થિતો મૂલો મૂલવિદ્યાકુલોદયા ।
માયાપો મોહનોન્માદી મહાગુરુનિવાસિની ॥ ૪૯॥

મહાશુક્લામ્બરધરો મલયાગુરુધૂપિતા ।
મધૂપિની મધૂલ્લાસો માધ્વીરસસમાશ્રયા ॥ ૫૦॥

મહાગુરુર્મહાદેહો મહોત્સાહા મહોત્પલા ।
મધ્યપઙ્કજસંસ્થાતા મધ્યામ્બુજનિવાસિની ॥ ૫૧॥

મારીભયહરો મલ્લો મલ્લગ્રહવિરોધિની ।
મહામુણ્ડલયોન્માદી મદઘૂર્ણીતલોચના ॥ ૫૨॥

મહાસદ્યોજાતકાલો મહાકપિલવર્તીની ।
મેઘવાહો મહાવક્ત્રો મનસામણિધારિણી ॥ ૫૩॥

મરણાશ્રયહન્તા ચ મહાગુર્વીગણસ્થિતા ।
મહાપદ્મસ્થિતો મન્ત્રો મન્ત્રવિદ્યાનિધીશ્વરી ॥ ૫૪॥

મકરાસનસંસ્થાતા મહામૃત્યુવિનાશિની ।
મોહનો મોહિનીનાથો મત્તનર્તનવાસિની ॥ ૫૫॥

મહાકાલકુલોલ્લાસી મહાકામાદિનાશિની ।
મૂલપદ્મનિવાસી ચ મહામૂલકુલોદયા ॥ ૫૬॥

માસાખ્યો માંસનિલયા મઙ્ગલસ્થા મહાગુણા ।
માયાછન્નતરો મીનો મીમાંસાગુણવાદિની ॥ ૫૭॥

મીમાંસાકારકો માયી માર્જારસિદ્ધિદાયિની ।
મેદિનીવલ્લભક્ષેમો મેદિનીજ્ઞાનમોદિની ॥ ૫૮॥

મૌષલીશ મૃષાર્થસ્થો મનકલ્પિતકેશરી ।
મનસ શ્રીધરો જાપો મન્દહાસસુશોભિતા ॥ ૫૯॥

મૈનાકો મેનકાપુત્રો માયાછન્ના મહાક્રિયા ।
મહાક્રિયા ચ લોમાણ્ડો મણ્ડલાસનશોભિતા ॥ ૬૦॥

માયાધારણકર્તા ચ મહાદ્વેષવિનાશિની ।
મુક્તકેશી મુક્તદેહો મુક્તિદા મુક્તિમાનિની ॥ ૬૧॥

મુક્તાહારધરો મુક્તો મુક્તિમાર્ગપ્રકાશિની ।
મહામુક્તિક્રિયાચ્છન્નો મહોચ્ચગિરિનન્દિની ॥ ૬૨॥

મૂષલાદ્યસ્ત્રહન્તા ચ મહાગૌરીમનઃક્રિયા ।
મહાધની મહામાની મનોમત્તા મનોલયા ॥ ૬૩॥

મહારણગત સાન્તો મહાવીણાવિનોદિની ।

મહાશત્રુનિહન્તા ચ મહાસ્ત્રજાલમાલિની ॥ ૬૪॥

શિવો રુદ્રો વલીશાની કિતવામોદવર્ધીની ।
ચન્દ્રચૂડાધરો વેદો મદોન્મત્તા મહોજ્જ્વલા ॥ ૬૫॥

વિગલત્કોટિચન્દ્રાભો વિધુકોટિસમોદયા ।
અગ્નિજ્વાલાધરો વીરો જ્વાલામાલાસહસ્રધા ॥ ૬૬॥

ભર્ગપ્રિયકરો ધર્મો મહાધાર્મીકતત્પરા ।
ધર્મધ્વજો ધર્મકર્તા ધર્મગુપ્તિ પ્રસૃત્ત્વરી ॥ ૬૭॥

મહાવિદ્રુમપૂરસ્થો વિદ્રુમાભાયુતપ્રભા ।
પુષ્પમાલાધરો માન્યો શત્રૂણાં કુલનાશિની ॥ ૬૮॥

કોજાગરો વિસર્ગસ્થો બીજમાલાવિભૂષિતા ।
બીજચન્દ્રો બીજપૂરો બીજાભા વિઘ્નનાશિની ॥ ૬૯॥

વિશિષ્ટો વિધિમોક્ષસ્થો વેદાઙ્ગપરિપૂરિણી ।
કિરાતિનીપતિ શ્રીમાન્ વિજ્ઞાવિજ્ઞજનપ્રિયા ॥ ૭૦॥

વર્ધસ્થો વર્ધસમ્પન્નો વર્ણમાલાવિભૂષિતા ।
મહાદ્રુમગત શૂરો વિલસત્કોટિચન્દ્રભા ॥ ૭૧॥

મહાકુમારનિલયો મહાકામકુમારિકા ।
કામજાલક્રિયાનાથો વિકલા કમલાસના ॥ ૭૨॥

ખણ્ડબુદ્ધિહરો ભાવો ભવતીતિ દુરાસના ।
અસંખ્યકો રૂપસંખ્યો નામસંખ્યાદિપૂરણી ॥ ૭૩॥

સઘ્નનાધમના કોષકિઙ્કિણીજાલમાલિની ।
ચન્દ્રાયુતમુખામ્ભોજો વિભાયુતસમાનના ॥ ૭૪॥

કાલબુદ્ધિહરો બાલો ભગવત્યમ્બિકાડણ્ડજા ।
મુણ્ડહસ્તશ્ચાતુરાઘઃ વિવાદરહિતાડવૃતા ॥ ૭૫॥

પઞ્ચમાચારકુશલો મહાપઞ્ચમલાલસા ।
વિકારશૂન્યો દુર્ધર્ષો દ્વિપદા માનુષક્રિયા ॥ ૭૬॥

મયદાનવકર્મસ્થો વિધાતૃકર્મબોધિની ।
કલિકાલક્રિયારૂઢ વાયવીઘર્ઘરધ્વનિ ॥ ૭૭॥

સર્વસઞ્ચારકર્તા ચ સર્વસઞ્ચારકર્ત્રીકા ।
મન્દમન્દગતિપ્રેમા મન્દમન્દગતિસ્થિતા ॥ ૭૮॥

સાટ્ટહાસો વિધુકલા ચાઘોરાઘોરયાતના ।
મહાનરકહર્તા ચ નરકાદિવિપાકહા ॥ ૭૯॥

પઞ્ચરશ્મિસમુદ્ભૂતો નગાદિબલઘાતિની ।
ગરુડાસનસમ્પૂજ્યો ગરુડપ્રેમવર્ધીની ॥ ૮૦॥

અશ્વત્થવૃક્ષનિલયો વટવૃક્ષતલસ્થિતા ।
ચિરાઙ્ગો પ્રથમાબુદ્ધિ પ્રપઞ્ચસારસઙ્ગતિ ॥ ૮૧॥

સ્થિતિકર્તા સ્થિતિચ્છાયા વિમદા છત્રધારિણી ।
દાડિમાભાસકુસુમો દાડિમોદ્ભવપુષ્પિકા ॥ ૮૨॥

દ્રાઢ્યો દ્રવીભરતિકા રતિકાલાપવર્ધીની ।
રત્નગર્ભો રત્નમાલા રત્નેશ્વર ઇવાગતિ ॥ ૮૩॥

પ્રસિદ્ધઃ પાવની પુચ્છા પુચ્છસુસ્થ પરાપરા ।
ખેચરી ખેચર સ્વસ્થો મહાખડ્ગધરા જયા ॥ ૮૪॥

કિશોરભાવખેલસ્થો વિખનાદિપ્રકારિકા ।
મહાશબ્દપ્રકાશશ્ચ મહાશબ્દપ્રકાશિકા ॥ ૮૫॥

ચારુહાસો વિપધન્તા શત્રુમિત્રગણસ્થિતા ।
વજ્રદણ્ડધરો વ્યાઘ્રો વિયત્ખેલનખઞ્જના ॥ ૮૬॥

ગદાધર શીલધારી શશિકર્પૂરગાડબલા ।
વસનાસનકારી ચ વસનાવસનપ્રિયા ॥ ૮૭॥

મહાવિદ્યાધરો ગુપ્તો વિશિષ્ટગોપનક્રિયા ।
ગુપ્તગીતાગાયનસ્થો ગુપ્તશાસ્ત્રગલપ્રદા ॥ ૮૮॥

યોગવિદ્યાપુરાણશ્ચ યાગવિદ્યા વિભાકલા ।
એકકાલો દ્વિકાલશ્ચાત્ર કાલફલામ્બુજા ॥ ૮૯॥

અષ્ટાદશભુજો રૌદ્રી ભુજગા વિઘ્નનાશિની ।
વિદ્યાગોપનકારી ચ વિદ્યાસિદ્ધિપ્રદાયિની ॥ ૯૦॥

વિજયાનન્દગો મન્દો મહાકાલમહેશ્વરી ।
ભૂતિદાનરતો માર્ગો મહદ્ગીતાપ્રકાશિની ॥ ૯૧॥

કેશાદ્યાવેશસન્તાનો મઙ્ગલાભા કુલાન્તરા ।
દ્વિભુજો વેદબાહુશ્ચ ષડ્ભુજા કામચારિણી ॥ ૯૨॥

ચન્દ્રકાન્તમાલ્યધરો લોકાતિલોકરાગિણી ।
ત્રિભઙ્ગદેહનિકરો વિભાઙ્ગસ્થા વિનોદિની ॥ ૯૩॥

ત્રિકૂટસ્થસ્ત્રિભાવસ્થસ્ત્રિશરીરા ત્રિકાલજા ।
એકવક્ત્રો દ્વિવક્ત્રશ્ચ વક્ત્રશૂન્યા શિશુપ્રિયા ॥ ૯૪॥

શ્રી વિદ્યામન્ત્રજાલસ્થો વિજ્ઞાની કુશલેશ્વરી ।
ઘટાસરગતો ગૌરા ગૌરવી ગૌરિકાડચલા ॥ ૯૫॥

ગુરુજ્ઞાનગતો ગન્ધો ગન્ધભોગ્યા ગિરિધ્વજા ।
છાયામણ્ડલમધ્યસ્થો વિકટા પુષ્કરાનના ॥ ૯૬॥

કામાખ્યો નિરહઙ્કાર કામરૂપનૃપાઙ્ગજા ।
સુલભો દુર્લભો દુઃખી સૂક્ષ્માતિસૂક્ષ્મરૂપિણી ॥ ૯૭॥

બીજજાપપશો ક્રૂરો વિમોહગુણનાશિની ।
અર્ધરો નિપુણોલ્લાશો વિભુરૂપા સરસ્વતી ॥ ૯૮॥

અનન્તઘોષનિલયો વિહઙ્ગગણગામિની ।
અચ્યુતેશ પ્રકાણ્ડસ્થ પ્રચણ્ડફાલવાહિની ॥ ૯૯॥

અભ્રાન્તો ભ્રાન્તિરહિતા શ્રાન્તો યાન્તિ પ્રતિષ્ઠિતા ।
અવ્યર્થો વ્યર્થવાક્યસ્થો વિશઙ્કાશઙ્કયાન્વિતા ॥ ૧૦૦॥

યમુનાપતિપ પીનો મહાકાલવસાવહા ।
જમ્બૂદ્વીપેશ્વર પાર પારાવારકૃતાસની ॥ ૧૦૧॥

વજ્રદણ્ડધર શાન્તો મિથ્યાગતિરતીન્દ્રિયા ।
અનન્તશયનો ન્યૂનઃ પરમાહ્લાદવર્ધીની ॥ ૧૦૨॥

શિષ્ટાશ્રણિલયો વ્યાખ્યો વસન્તકાલસુપ્રિયા ।
વિરજાન્દોલિતો ભિન્નો વિશુદ્ધગુણમણ્ડિતા ॥ ૧૦૩॥

અઞ્જનેશઃ ખઞ્જનેશ પલલાસવભક્ષિણી ।
અઙ્ગભાષાકૃતિસ્નાતા સુધારસફલાતુરા ॥ ૧૦૪॥

ફલબીજધરો દૌર્ગો દ્વારપાલનપલ્લવા ।

પિપ્પલાદઃ કારણશ્ચ વિખ્યાતિરતિવલ્લભા ॥ ૧૦૫॥

સંહારવિગ્રહો વિપ્રો વિષણ્ણા કામરૂપિણી ।
અવલાપો નાપનાપો વિક્લૃપ્તા કંસનાશિની ॥ ૧૦૬॥

હઠાત્કારેણતો ચામો નાચામો વિનયક્રિયા ।
સર્વ સર્વસુખાચ્છન્નો જિતાજિતગુણોદયા ॥ ૧૦૭॥

ભાસ્વત્કિરીટો રાઙ્કારી વરુણેશીતલાન્તરા ।
અમૂલ્યરત્નદાનાઢ્યો દિવારાત્રિસ્ત્રિખણ્ડજા ॥ ૧૦૮॥

મારબીજમહામાનો હરબીજાદિસંસ્થિતા ।
અનન્તવાસુકીશાનો લાકિની કાકિની દ્વિધા ॥ ૧૦૯॥

કોટિધ્વજો બૃહદ્દુર્ગશ્ચામુણ્ડા રણચણ્ડિકા ।
ઉમેશો રત્નમાલેશી વિકુમ્ભગણપૂજિતા ॥ ૧૧૦॥

નિકુમ્ભપૂજિત કૃષ્ણો વિષ્ણુપત્ની સુધાત્મિકા ।
અલ્પકાલહરઃ કુન્તો મહાકુન્તાસ્ત્રધારિણી ॥ ૧૧૧॥

બ્રહ્માસ્ત્રધારક ક્ષિપ્રો વનમાલાવિભૂષિતા ।
એકાક્ષર દ્વ્યક્ષરશ્ચ ષોડશાક્ષરસમ્ભવા ॥ ૧૧૨॥

અતિગમ્ભીરવાતસ્થો મહાગમ્ભીરવાદ્યગા ।
ત્રિવિધાત્મા ત્રિદેશાત્મા તૃતીયાત્રાણકારિણી ॥ ૧૧૩॥

કિયત્કાલચલાનન્દો વિહઙ્ગગમનાસના ।
ગીર્વાણ બાણહન્તા ચ બાણહસ્તા વિધૂચ્છલા ॥ ૧૧૪॥

બિન્દુધર્મોજ્જ્વલોદારો વિયજ્જ્વલનકારિણી ।
વિવાસા વ્યાસપૂજ્યશ્ચ નવદેશીપ્રધાનિકા ॥ ૧૧૫॥

વિલોલવદનો વામો વિરોમા મોદકારિણી ।
હિરણ્યહારભૂષાઙ્ગઃ કલિઙ્ગનન્દિનીશગા ॥ ૧૧૬॥

અનન્યક્ષીણવક્ષશ્ચ ક્ષિતિક્ષોભવિનાશિકા ।
ક્ષણક્ષેત્રપ્રસાદાઙ્ગો વશિષ્ઠાદિઋષીશ્વરી ॥ ૧૧૭॥

રેવાતીરનિવાસી ચ ગઙ્ગાતીરનિવાસિની ।
ચાઙ્ગેશઃ પુષ્કરેશશ્ચ વ્યાસભાષાવિશેષિકા ॥ ૧૧૮॥

અમલાનાથસંજ્ઞશ્ચ રામેશ્વરસુપૂજિતા ।
રમાનાથ પ્રભુ પ્રાપ્તિ કીર્તીદુર્ગાભિધાનિકા ॥ ૧૧૯॥

લમ્બોદર પ્રેમકાલો લમ્બોદરકુલપ્રિયા ।
સ્વર્ગદેહો ધ્યાનમાનો લોચનાયતધારિણી ॥ ૧૨૦॥

અવ્યર્થવચનપ્રક્ષ્યો વિદ્યાવાગીશ્વરપ્રિયા ।
અબ્દમાનસ્મૃતિપ્રાણ કલિઙ્ગનગરેશ્વરી ॥ ૧૨૧॥

અતિગુહ્યતરજ્ઞાની ગુપ્તચન્દ્રાત્મિકાऽવ્યયા ।
મણિનાગગતો ગન્તા વાગીશાની બલપ્રદા ॥ ૧૨૨॥

કુલાસનગતો નાશો વિનાશા નાશસુપ્રિયા ।
વિનાશમૂલઃ કૂલસ્થઃ સંહારકુલકેશ્વરી ॥ ૧૨૩॥

ત્રિવાક્યગુણવિપ્રેન્દ્રો મહદાશ્ચર્યચિત્રિણી ।
આશુતોષગુણાચ્છન્ન મદવિહ્વલમણ્ડલા ॥ ૧૨૪॥

વિરૂપાક્ષી લેલિહશ્ચ મહામુદ્રાપ્રકાશિની ।
અષ્ટાદશાક્ષરો રુદ્રો મકરન્દસુબિન્દુગા ॥ ૧૨૫॥

છત્રચામરધારી ચ છત્રદાત્રી ત્રિપૌણ્ડ્રજા ।
ઇન્દ્રાત્મકો વિધાતા ચ ધનદા નાદકારિણી ॥ ૧૨૬॥

કુણ્ડલીપરમાનન્દો મધુપુષ્પસમુદ્ભવા ।
બિલ્વવૃક્ષસ્થિતો રુદ્રો નયનામ્બુજવાસિની ॥ ૧૨૭॥

હિરણ્યગર્ભ કૌમારો વિરૂપાક્ષા ઋતુપ્રિયા ।
શ્રીવૃક્ષનિલયશ્યામો મહાકુલતરૂદ્ભવા ॥ ૧૨૮॥

કુલવૃક્ષસ્થિતો વિદ્વાન્ હિરણ્યરજતપ્રિયા ।
કુલપઃ પ્રાણપ પ્રાણા પઞ્ચચૂડધરાધરા ॥ ૧૨૯॥

ઉષતી વેદિકાનાથો નર્મધર્મવિવેચિકા ।
શીતલાપ્ત શીતહીનો મનઃસ્થૈર્યકરી ક્ષયા ॥ ૧૩૦॥

કુક્ષિસ્થ ક્ષણભઙ્ગસ્થો ગિરિપીઠનિવાસિની ।
અર્ધકાયઃ પ્રસન્નાત્મા પ્રસન્નવનવાસિની ॥ ૧૩૧॥

પ્રતિષ્ઠેશ પ્રાણધર્મા જ્યોતીરૂપા ઋતુપ્રિયા ।
ધર્મધ્વજપતાકેશો બલાકા રસવર્દ્ધીની ॥ ૧૩૨॥

મેરુશ‌ૃઙ્ગગતો ધૂર્તો ધૂર્તમત્તા ખલસ્પૃહા ।
સેવાસિદ્ધિપ્રદોઽનન્તોઽનન્તકાર્યવિભેદિકા ॥ ૧૩૩॥

ભાવિનામત્ત્વજાનજ્ઞો વિરાટપીઠવાસિની ।
વિચ્છેદચ્છેદભેદશ્ચ છલન્શાસ્ત્રપ્રકાશિકા ॥ ૧૩૪॥

ચારુકર્મ્યા સંસ્કૃતશ્ચ તપ્તહાટકરૂપિણી ।
પરાનન્દરસજ્ઞાની રસસન્તાનમન્ત્રિણી ॥ ૧૩૫॥

પ્રતીક્ષ સૂક્ષ્મશબ્દશ્ચ પ્રસઙ્ગસઙ્ગતિપ્રિયા ।
અમાયી સાગરોદ્ભૂતો વન્ધ્યાદોષવિવર્જીતા ॥ ૧૩૬॥

જિતધર્મો જ્વલચ્છત્રી વ્યાપિકા ફલવાહના ।
વ્યાઘ્રચર્મામ્બરો યોગી મહાપીના વરપ્રદા ॥ ૧૩૭॥

વરદાતા સારદાતા જ્ઞાનદા વરવાહિની ।
ચારુકેશધરો માપો વિશાલા ગુણદાઽમ્બરા ॥ ૧૩૮॥

તાઽઙ્કુમાલાનિર્માલધરસ્તાઽઙ્કુમોહિની ।
પઞ્ચાલદેશ સન્ભૂતો વિશુદ્ધસ્વરવલ્લભા ॥ ૧૩૯॥

કિરાતપૂજિતો વ્યાધો મનુચિન્તાપરાયણા ।
શિવ વાક્યરતો વામો ભૃગુરામકુલેશ્વરી ॥ ૧૪૦॥

સ્વયમ્ભૂ કુસુમાચ્છન્નો વિધિવિદ્યાપ્રકાશિની ।
પ્રભાકરતનૂદ્ભૂતો વિશલ્યકરણીશ્વરી ॥ ૧૪૧॥

ઉષતીશ્વર સમ્પર્કી યોગવિજ્ઞાનવાસિની ।
ઉત્તમો મધ્યમો વ્યાખ્યો વાચ્યાવાચ્યવરાઙ્ગના ॥ ૧૪૨॥

આમ્બીજવાદરોષાઢ્યા મન્દરોદરકારિણી ।
કૃષ્ણસિદ્ધાન્તસંસ્થાનો યુદ્ધસાધનચર્ચીકા ॥ ૧૪૩॥

મથુરાસુન્દરીનાથો મથુરાપીઠવાસિની ।
પલાયનવિશૂન્યશ્ચ પ્રકૃતિપ્રત્યયસ્થિતા ॥ ૧૪૪॥

પ્રકૃતિપ્રાણનિલયો વિકૃતિજ્ઞાનનાશિની ।
સર્વશાસ્ત્રવિભેદશ્ચ મત્તસિંહાસનાસના ॥ ૧૪૫॥

ઇતિહાસપ્રિયો ધીરો વિમલાઽમલરૂપિણી ।

મણિસિંહાસનસ્થશ્ચ મણિપૂરજયોદયા ॥ ૧૪૬॥

ભદ્રકાલીજપાનન્દો ભદ્રાભદ્રપ્રકાશિની ।
શ્રીભદ્રો ભદ્રનાથશ્ચ ભયભઙ્ગવિહિંસિની ॥ ૧૪૭॥

આત્મારામો વિધેયાત્મા શૂલપાણિપ્રિયાઽન્તરા ।
અતિવિદ્યાદૃઢાભ્યાસો વિશેષવિત્તદાયિની ॥ ૧૪૮॥

અજરાઽમરકાન્તિશ્ચ કાન્તિકોટિધરા શુભા ।
પશુપાલ પદ્મસંસ્થ શ્રીશપાશુપતાઽસ્ત્રદા ॥ ૧૪૯॥

સર્વશાસ્ત્રધરો દૃપ્તો જ્ઞાનિની જ્ઞાનવર્ધીની ।
દ્વિતીયાનાથ ઈશાર્દ્ધો બાદરાયણમોહિની ॥ ૧૫૦॥

શવમાંસાશનો ભીમો ભીમનેત્રા ભયાનકા ।
શિવજ્ઞાનક્રમો દક્ષ ક્રિયાયોગપરાયણા ॥ ૧૫૧॥

દાનસ્થો દાનસમ્પન્નો દન્તુરા પાર્વતીપરા ।
પ્રિયાનન્દો દિવાકર્તા નિશાનિષાદઘાતિની ॥ ૧૫૨॥

અષ્ટહસ્તો વિલોલાક્ષો મનઃસ્થાપનકારિણી ।
મૃદુપુત્રો મૃદુચ્છત્રો વિભાઽઙ્ગપુણ્યનન્દિની ॥ ૧૫૩॥

અન્તરિક્ષગતો મૂલો મૂલપુત્રપ્રકાશિની ।
અભીતિદાનનિરતો વિધુમાલામનોહરી ॥ ૧૫૪॥

ચતુરાસ્રજાહ્નવીશો ગિરિકન્યા કુતૂહલી ।
શિશુપાલરિપુપ્રાણો વિદેશપદરક્ષિણી ॥ ૧૫૫॥

વિલક્ષણો વિધિજ્ઞાતા માનહન્ત્રી ત્રિવિક્રમા ।
ત્રિકોણાનનયોગીશો નિમ્નનાભિર્નગેશ્વરી ॥ ૧૫૬॥

નવીન ગુણસમ્પન્નો નવકન્યાકુલાચલા ।
ત્રિવિધેશો વિશઙ્કેતો વિજ્વરા જ્વરદાયિની ॥ ૧૫૭॥

અતિધામીકપુત્રશ્ચ ચારુસિંહાસનસ્થિતા ।
સ્થાપકોત્તમવર્ગાણાં સતાં સિદ્ધિપ્રકાશિની ॥ ૧૫૮॥

સિદ્ધપ્રિયો વિશાલાક્ષો ધ્વંસકર્ત્રી નિરઞ્જના ।
શક્તીશો વિકલેશશ્ચ ક્રતુકર્મફલોદયા ॥ ૧૫૯॥

વિફલેશો વિયદ્ગ્રામી લલિતા બુદ્ધિવાહના ।
મલયાદ્રિતપ ક્ષેમ ક્ષયકર્ત્રી રજોગુણા ॥ ૧૬૦॥

દ્વિરુણ્ડકો દ્વારપાલો બલેવીઘ્નવિનાશિની ।
માયાપદ્મગતો માનો મારીવિઘ્નાવિનાશિની ॥ ૧૬૧॥

હિઙ્ગુલાજસ્થિત સિદ્ધો વિદુષાં વાદસારિણી ।
શ્રીપતીશ શ્રીકરેશ શ્રીવિદ્યા ભુવનેશ્વરી ॥ ૧૬૨॥

મતિપ્રથમજો ધન્યો મિથિલાનાથપુત્રિકા ।
રામચન્દ્રપ્રિય પ્રાપ્તો રઘુનાથકુલેશ્વરી ॥ ૧૬૩॥

કૂર્મઃ કૂર્મગતો વીરો વસાવર્ગા ગિરીશ્વરી ।
રાજરાજેશ્વરીબાલો રતિપીઠગુણાન્તરા ॥ ૧૬૪॥

કામરૂપધરોલ્લાસો વિદગ્ધા કામરૂપિણી ।
અતિથીશ સર્વભર્તા નાનાલઙ્કારશોભિતા ॥ ૧૬૫॥

નાનાલઙ્કારભૂષાઙ્ગો નરમાલાવિભૂષિતા ।
જગન્નાથો જગદ્વ્યાપી જગતામિષ્ટસિદ્ધિદા ॥ ૧૬૬॥

જગત્કામો જગદ્વ્યાપી જયન્તી જયદાયિની ।
જયકારી જીવકારી જયદા જીવની જયા ॥ ૧૬૭॥

જયો ગણેશ શ્રીદાતા મહાપીઠનિવાસિની ।
વિષમ સામવેદસ્થો યજુર્વેદાંશયોગયા ॥ ૧૬૮॥

ત્રિકાલગુણગમ્ભીરો દ્વાવિંશતિકરામ્બુજા ।
સહસ્રબાહુ સારસ્થો ભાગગા ભવભાવિની ॥ ૧૬૯॥

ભવનાદિકરો માર્ગો વિનીતા નયનામ્બુજા ।
સર્વત્રાકર્ષકોડખણ્ડ સર્વજ્ઞાનાભિકર્ષીણી ॥ ૧૭૦॥

જિતાશયો જિતવિપ્રઃ કલઙ્કગુણવર્જીતા ।
નિરાધારો નિરાલમ્બો વિષયા જ્ઞાનવર્જીતા ॥ ૧૭૧॥

અતિવિસ્તારવદનો વિવાદખલનાશિની ।
ભાર્યાનાથઃ ક્ષોભનાશો રિપૂણાં કુલપૂજિતા ॥ ૧૭૨॥

આશવો ભૂરિવર્ગાણાં ચારુકુન્તલમણ્ડિતા ।
અતિબુદ્ધિધરો સૂક્ષ્મો રજનીધ્વાન્તનાશિની ॥ ૧૭૩॥

જ્યોત્સ્નાજાલકરો યોગી વિયોગશાયિની યુગા ।
યુગગામી યોગગામી જયદા લાકિની શિવા ॥ ૧૭૪॥

સંજ્ઞાબુદ્ધિકરો ભાવો ભવભીતિવિમોહિની ।
સુન્દર સુન્દરાનન્દો રતિકારતિસુન્દરી ॥ ૧૭૫॥

રતિજ્ઞાની રતિસુખો રતિનાથપ્રકાશિની ।
બુદ્ધરૂપી બોધમાત્રો વૈરોધો દ્વૈતવર્જીતા ॥ ૧૭૬॥

ભૂરિભાવહરાનન્દો ભૂરિસન્તાનદાયિની ।
યજ્ઞાસાધનકર્તા ચ સુયજ્ઞ પઞ્ચમોચના ॥ ૧૭૭॥

કોટિકોટિચન્દ્રતેજઃ કોટિકોટિરુચિચ્છટા ।
કોટિકોટિચઞ્ચલાભો દ્વિકોટ્યયુતચઞ્ચલા ॥ ૧૭૮॥

કોટિસૂર્યાચ્છન્નદેહ કોટિકોટિરવિપ્રભા ।
કોટિચન્દ્રકાન્તમણિ કોટીન્દુકાન્તનિર્મલા ॥ ૧૭૯॥

શતકોટિવિધુમણિ શતકોટીન્દુકાન્તગા ।
વિલસત્કોટિકાલાગ્નિ કોટિકાલાનલોપમા ॥ ૧૮૦॥

કોટિવહ્નિગતો વહ્નિ વહ્નિજાયા દ્વિગોદ્ભવા ।
મહાતેજો વહ્નિવારિઃ કાલાગ્નિહારધારિણી ॥ ૧૮૧॥

કાલાગ્નિરુદ્રો ભગવાન્ કાલાગ્નિરુદ્રરૂપિણી ।
કાલાત્મા કલિકાલાત્મા કલિકા કુલલાકિની ॥ ૧૮૨॥

મૃત્યુજિતો મૃત્યુતેજા મૃત્યુઞ્જયમનુપ્રિયા ।
મહામૃત્યુહરો મૃત્યુઽપમૃત્યુવિનાશિની ॥ ૧૮૩॥

જયો જયેશો જયદો જયદા જયવર્ધીની ।
જયકરો જગદ્ધર્મો જગજ્જીવનરક્ષિણી ॥ ૧૮૪॥

સર્વજિત્ સર્વરૂપી ચ સર્વદા સર્વભાવિની ।
ઇત્યેતત્ કથિતં નાથ મહાવિદ્યાભિધાનકમ્ ॥ ૧૮૫॥

શબ્દબ્રહ્મમયં સાક્ષાત્ કલ્પવૃક્ષસ્વરૂપકમ્ ।
અષ્ટોત્તરસહસ્રાખ્યં શતસંખ્યાસમાકુલમ્ ॥ ૧૮૬॥

ત્રૈલોક્યમઙ્ગલક્ષેત્રં સિદ્ધવિદ્યાફલપ્રદમ્ ।

સકલં નિષ્કલં સાક્ષાત્ કલ્પદ્રુમકલાન્વિતમ્ ॥ ૧૮૭॥

યોગિનામાત્મવિજ્ઞાનમાત્મજ્ઞાનકરં પરમ્ ।
યઃ પઠેદ્ ભાવસમ્પૂર્ણો મિથ્યાધર્મવિવર્જીતઃ ॥ ૧૮૮॥

રુદ્રપીઠે સ્વયં ભૂત્વા મહાયોગી ભવેદ્ધ્રુવમ્ ।
અકસ્માત્સિદ્ધિમાપ્નોતિ ચાધમામ્માલ્યદાયિનીમ્ ॥ ૧૮૯॥

રાજલક્ષ્મીધનૈશ્વર્યમતિધૈર્ય હયાદિકમ્ ।
કુઞ્જરં સુન્દરં વીરં પુત્રં રાજ્યં સુખં જયમ્ ॥ ૧૯૦॥

રાજરાજેશ્વરત્વં ચ દિવ્યવાહનમેવ ચ ।
અક્લેશપઞ્ચમાસિદ્ધિં તતઃ પ્રાપ્નોતિ મધ્યમામ્ ॥ ૧૯૧॥

અત્યન્તદુઃખહનનં ગુરુત્વં લોકમણ્ડલે ।
દેવાનાં ભક્તિસંખ્યાઞ્ચ દિવ્યભાવં સદા સુખમ્ ॥ ૧૯૨॥

આયુર્વૃદ્ધિં લોકવશ્યં પૂર્ણકોશં હિ ગોધનમ્ ।
દેવાનાં રાજ્યભવનં પ્રત્યક્ષે સ્વપ્નકાલકે ॥ ૧૯૩॥

દીર્ઘદૃષ્ટિભયત્યાગં ચાલ્પકાર્યવિવર્જીતમ્ ।
સદા ધર્મપ્રિયત્વં ચ ધર્મજ્ઞાનં મહાગુણમ્ ॥ ૧૯૪॥

વિવેકાઙ્કુરમાનન્દં શ્રીવાણીસુકૃપાન્વિતમ્ ।
તત ઉત્તમયોગસ્થાં સિદ્ધિં પ્રાપ્નોતિ સાધકઃ ॥ ૧૯૫॥

અનન્તગુણસંસ્થાનં માયાર્થભૂતિવર્જનમ્ ।
એકાન્તસ્થાનવસતિં યોગશાસ્ત્રનિયોજનમ્ ॥ ૧૯૬॥

સર્વાકાઙ્ક્ષાવિશૂન્યત્વં દૈવતૈકાન્તસેવનમ્ ।
ખેચરત્વં સર્વગતિં ભાવસિદ્ધિં સુરપ્રિયમ્ ॥ ૧૯૭॥

સદા રૌદ્રક્રિયાયોગં વિભૂત્યષ્ટાઙ્ગસિદ્ધિદમ્ ।
દૃઢજ્ઞાનં સર્વશાસ્ત્રકારિત્વં રસસાગરમ્ ॥ ૧૯૮॥

એકભાવં દ્વૈતશૂન્યં મહાપદનિયોજનમ્ ।
મહાગુણવતીવિદ્યાપતિત્વં શાન્તિમેવ ચ ॥ ૧૯૯॥

પ્રાપ્નોતિ સાધકશ્રેષ્ઠો યઃ પઠેદ્ ભાવનિશ્ચલઃ ।
ત્રિકાલમેકકાલં વા દ્વિકાલં વા પઠેત્ સુધીઃ ॥ ૨૦૦॥

શતમષ્ટોત્તરં ચાસ્ય પુરશ્ચર્યાવિધિઃ સ્મૃતઃ ।
પુરશ્ચરણમાકૃત્ય પઠિત્વા ચ પુનઃ પુનઃ ॥ ૨૦૧॥

અષ્ટૈશ્વર્યયુતો ભૂત્વા મનોગતિમવાપ્નુયાત્ ।
સર્વત્ર કુશલં વ્યાપ્તં યઃ પઠેન્નિયતઃ શુચિઃ ॥ ૨૦૨॥

ષટ્ચક્રમણિપીઠઞ્ચ ભિત્ત્વાઽનાહતગો ભવેત્ ।
અનાહતં તતો ભિત્ત્વા વિશુદ્ધસઙ્ગમો ભવેત્ ॥ ૨૦૩॥

વિશુદ્ધપદ્મં ભિત્ત્વા ચ શીર્ષે દ્વિદલગો ભવેત્ ।
દ્વિદલાદિમહાપદ્મં ભિત્ત્વૈતત્ સ્તોત્રપાઠતઃ ॥ ૨૦૪॥

ચતુર્વર્ગાં ક્રિયાં કૃત્વા ચાન્તે નિર્વાણમોક્ષભાક્ ।
યોગિનાં યોગસિદ્ધ્યર્થે સર્વભૂતદયોદયમ્ ॥ ૨૦૫॥

નિર્વાણમોક્ષસિદ્ધ્યર્થે કથિતં પરમેશ્વર ।
એતત્સ્તવનપાઠેન કિં ન સિદ્ધ્યતિ ભૂતલે ॥ ૨૦૬॥

કુલં કુલક્રમેણૈવ સાધયેદ્ યોગસાધનમ્ ।
યોગાન્તે યોગમધ્યે ચ યોગાદ્યે પ્રપઠેત્ સ્તવમ્ ॥ ૨૦૭॥

કૃત્તિકારોહિણીયોગયાત્રાયાં મિથુને તથા ।
શ્રવણાયાં મેષગણે કુજે ચેન્દુસમાકુલે ॥ ૨૦૮॥

શનિવારે ચ સઙ્ક્રાન્ત્યાં કુજવારે પુનઃ પુનઃ ।
સન્ધ્યાકાલે લિખેત્ સ્તોત્રં ધ્યાનધારણયોગિરાટ્ ॥ ૨૦૯॥

ભૂર્જપત્રે લિખિત્વા ચ કણ્ઠે શીર્ષે પ્રધારયેત્ ।
અથવા રાત્રિયોગે ચ કુલચક્રે લિખેત્ સુધીઃ ॥ ૨૧૦॥

સર્વત્ર કુલયોગેન પઠન્ સિદ્ધિમવાપ્નુયાત્ ।
એતન્નામ્ના પ્રજુહુયાત્ કાલિકાકૃતિમાન્ ભવેત્ ॥ ૨૧૧॥

તદ્દશાંશક્રમેણૈવ હુત્વા યોગીહ સર્વદા ।
મણિપૂરે દૃઢો ભૂત્વા રુદ્રશક્તિકૃપાં લભેત્ ॥ ૨૧૨॥

॥ ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે
લાકિનીશાષ્ટોત્તરશતસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Mark S.G. Dyczkowski muktAbodha

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrIlAkinIsahasranAmastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*